श्रीहनूमत्स्तोत्रम् २

{॥ श्रीहनूमत्स्तोत्रम् २ ॥}

आपन्नाखिललोकार्तिहारिणे श्रीहनूमते ।

अकस्मादागतोत्पातनाशनाय नमो नमः ॥ १॥

वामे करे वैरिभिदं वहन्तं शैलं परे शृङ्खलहारटङ्कम् ।

दधानमच्छाच्छसुवर्णवर्णं भजे ज्वलत्कुण्डलमाञ्जनेयम् ॥ २॥

विभीषण उवाच

सीतावियुक्ते श्रीरामे शोकदुःखभयापह ।

तापत्रयाग्निसंहारिन्नाञ्जनेय नमोऽस्तुते ॥ ३॥

आधिव्याधिमहामारिग्रहपीडापहारिणे ।

प्राणापहर्त्रे दैत्यानां रामप्रियहितात्मने ॥ ४॥

संसारसागरावर्तगतनिश्रान्तचेतसाम् ।

शरणागतसञ्जीवी सौमित्रिप्राणरक्षकः ॥ ५॥

सुचरित्रः सदानन्दः सर्वदा भक्तवत्सलः ।

सुरद्विषां सुसंहारी सुग्रीवानन्दवर्धनः ॥ ६॥

Stotram Digitalized By Sanskritdocuments.org

य इदं हनुमत्स्तोत्रं पठेन्नित्यं नरोत्तमः ।

सिद्ध्यन्ति सर्वकार्याणि धनधान्यसमृद्धयः ॥ ७॥

मृत्युदारिद्र्यनाशं च सङ्ग्रामे विजयी भवेत् ।

लाभं च राजवश्यं च सत्यं पावनकीर्तनम् ॥ ८॥

परं मन्त्रं परं तन्त्रं परयन्त्रं निवारयेत् ।

परविद्याविनाशं च ह्यात्ममन्त्रस्य रक्षकम् ॥ ९॥

From Hanumatstutimanjari, Mahaperiaval Publication

Proofread by PSA Easwaran psaeaswaran at gmail

Please send corrections to sanskrit@cheerful.com

Last updated त्oday

http://sanskritdocuments.org

Hanumath Stotram 2 Lyrics in Devanagari PDF
% File name : hanUmatstotram2.itx
% Location : doc_hanumaana
% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Transliterated by : Processed by Sowmya Ramkumar
% Proofread by : PSA Easwaran psaeaswaran at gmail
% Description-comments : From Hanumatstutimanjari, Mahaperiaval Publication
% Latest update : September 19, 2014
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org

%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [October 13, 2015] at Stotram Website